# Dhishuddhi Stotram

# धीशुद्धिस्तोत्रम्

## Document Information

Text title : Dhishuddhi Stotram

File name : dhIshuddhistotram.itx

Category : vishhnu, vAdirAja, vishnu, stotra

Location : doc_vishhnu

Author : vAdirAjayati

Proofread by : Mrs Sornavalli, Revathy R.

Latest update : May 10, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 10, 2024

*sanskritdocuments.org*

# धीशुद्धिस्तोत्रम्

चिन्तामणिर्हयग्रीवो वशे यस्य निषेविणः ।
सोऽपि सर्वार्थदो नृणां किमुतासौ हयाननः ॥ १॥

यं यं चिन्मय सन्मूर्ते धर्मं कुर्मस्तवाज्ञया ।
तं तं घ्नन्त्यसुराः किं तद्धन्ता त्वं तान्न कृन्तसि ॥ २॥

त्वद्दत्तपुण्यवित्तं मे सद्यः पापैरपाहरन् ।
कृद्धा दैत्या न दैत्यारे तद्विक्रान्तेरलं तव ॥ ३॥

स्वक्षेम राम मे कामे रक्षांस्यक्षाण्यचिक्षिपन् ।
तत्क्षाम्यं न हृषीकेशस्याक्षय्यत्रय्यधीशितुः ॥ ४॥

स्वप्नोऽपि सूचको यस्मात्तस्मादस्माकमच्युत ।
अस्वप्नप्रिय न स्वप्नेऽप्यक्षं निक्षिप दुष्कृते ॥ ५॥

क्वाहं नृहय तेंऽघ्र्यर्कशरणः करुणाम्बुधे ।
क्वेदं निस्सारसंसारनीहारावरणं मम ॥ ६॥

अनुत्साहमहोत्साहचरणस्मरणे सताम् ।
शरणे सति जल्पन्तः किमसन्तो हसन्ति नः ॥ ७॥

कस्य कस्य प्रियं ब्रूमः स्तुमः कं कं पदे पदे ।
कस्मै कस्मै दिशामोऽर्थं कस्माद्वाऽस्मत्प्रयोजनम् ॥ ८॥

को वा जीवापरस्त्राता देवाच्छ्रीवासुदेवतः ।
यो वा गा वाति यश्चोर्ध्वं तौ वातौ वामनाश्रितौ ॥ ९॥

मां चेन्मुञ्चति देवोऽसौ गां च मुञ्चति वैदिकीम् ।
सत्यव्रतस्य नासत्यं भक्तस्य न कदाऽपि भीः ॥ १०॥

प्रभो प्रबोध्य बोधाब्धिं प्रबुद्धबुधसाध्य ते ।
कृपाक्षपाकरकरश्चकोरीमिव पातु माम् ॥ ११॥

सेयं श्रीशहयग्रीवदासेनाऽऽचार्यसेविना ।
यतिना वादिराजेन स्तुतिर्धीशुद्धये कृता ॥ १२॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं
धीशुद्धिस्तोत्रं सम्पूर्णम् ।

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु ।

Proofread by Mrs Sornavalli

*Dhishuddhi Stotram*

pdf was typeset on May 10, 2024

Please send corrections to *sanskrit@cheerful.com*